5 योजकः तत्र दुर्लभः



एकः उष्ट्रः अस्ति।
उष्ट्रः स्वभावेन वक्रः अस्ति
सः सर्वदा दोषः एव पश्यति
एकदा सः वने अटति।



मार्गे सः वृक्षस्य उपरि एकं शुकं पश्यति।
उष्ट्रः शुकाय कथयति, ''हे शुक! तव
चञ्चुः वक्रा अस्ति।'' शुकः लज्जाम्
अनुभवति। उष्ट्रः हसति अग्रे चलति।



मार्गे सः कुक्कुरं पश्यति।
उष्ट्रः कुक्कुराय कथयति, ''हे कुक्कुरं ! तव
पुच्छं वक्रम् अस्ति।'' कुक्कुरः लज्जाम्
अनुभवति। उष्ट्रः हसति अग्रे चलति।



मार्गे बकः अस्ति। बकं दृष्टवा उष्ट्रः
वदति, ''तव ग्रीवा वक्रा अस्ति।''
बकः उष्ट्रं प्रति पश्यति अपि न।



मार्गे शृगालः मिलति। शृगालः
पृच्छति, ''उष्ट्रभ्रातः कथम् अस्ति ?
स्वास्थ्यं समीचीनं वा ?



उष्ट्रः वदति, ''स्वास्थ्यं समीचीनम् किन्तु
अन्यत् किमपि समीचीनम् नास्ति।
शुकस्य चञ्चुः वक्रा , कुक्कुरस्य पुच्छं वक्रम्,
बकस्य ग्रीवा वक्रा।''

''शृगालः वदति,'' शुकस्य चञ्चुः वक्रा किन्तु

सः मनुष्यवाणीं वक्तुं शक्नोति।

कुक्कुरस्य पुच्छं वक्रं किन्तु

सः स्वामिभक्तः अस्ति।

बकस्य ग्रीवा वक्रा किन्तु

तस्य एकाग्रता प्रचलिता।

भवतः सर्वाणि अङ्गानि वक्राणि सन्ति किन्तु

भवान् मरुभूम्याः नृपः अस्ति।

अपि च तेषां चञ्चोः, पुच्छस्य, ग्रीवायाः च प्रयोजनम् अस्ति। निरर्थकं नास्ति।

अमंत्रमक्षरं नास्ति नास्ति मूलमनौषधम्।

अयोग्यः पुरुषो नास्ति योजकस्तत्र दुर्लभः॥

टिप्पणी

उष्ट्रः ઊંટ **वक्रः** વાંકો (વિચિત્ર) **अटति** ભમે છે, ફરે છે **चञ्चुः** ચાંચ **ग्रीवा** ગરદન ડોક **समीचीनम्** સારું, બરાબર **अन्यत्** અન્ય, બીજું **मरुभूमिः** રણપ્રદેશ **नृपः** રાજા **प्रयोजनम्** હેતુ, ઉદ્દેશ **योजकः** જોડનાર, યોજના કરનાર, આયોજક

अमंत्रमक्षरम् – अमंत्रम् अक्षरम्, मूलमनौषधम् – मूलम् अनौषधम्, योजकस्तत्र – योजकः तत्र

स्वाध्यायः

1. નીચેના શબ્દોનું મોટેથી ઉચ્ચારણ કરો :

उष्ट्रभ्रातः, वक्रः, चञ्चुः, लज्जा, पुच्छम्, दृष्ट्वा, स्वास्थ्यम्, ग्रीवा, शक्नोति, स्वामिभक्तः, अमंत्रमक्षरम्, मूलमनौषधम्, योजकस्तत्र।

2. પાઠ વાંચીને નીચેના પ્રશ્નોના ઉત્તર સંસ્કૃતમાં આપો અને લખો :

(1) उष्ट्रः स्वभावेन कीदृशं अस्ति ?

(2) उष्ट्रः वृक्षस्य उपरि कं पश्यति ?

(3) उष्ट्रः शुकं किं कथयति ?

(4) कस्य पुच्छं वक्रम् अस्ति ?

(5) कः मनुष्यवाणी वस्तुं शक्नोति ? कस्य ग्रीवा वक्रा?

(6) कः मरुभूम्याः नृपः अस्ति ?

(7) कस्य स्वामिभक्तिः प्रचलिता ?

3. નીચે આપેલાં વિધાનોની સામેના ☐ માં પાઠને આધારે જો સાચું હોય તો 'आम्' અને ખોટું હોય તો 'न' લખો :

(1) शुकः स्वभावेन वक्रः अस्ति। ☐

(2) शुकस्य चञ्चुः वक्रा अस्ति। ☐

(3) बकः मनुष्यवाणीं वक्तुं शक्नोति। ☐

(4) शुकस्य एकाग्रता प्रचलिता अस्ति। ☐

(5) उष्ट्रः मरुभूम्याः नृपः अस्ति। ☐

4. કોષ્ટકમાં આપેલા શબ્દોનો યોગ્ય ઉપયોગ કરી વાક્ય બનાવો :

ઉદાહરણ : उष्ट्रः वने अटति।

अ	ब	क
उष्ट्रः	लज्जाम्	खादामि
शुकः	वने	पिबति
अहं	मोदकम्	पठति
किशनः	जलम्	अनुभवति
माला	पुस्तकम्	अटति

5. ઉદાહરણ મુજબ વાક્ય બનાવો :

ઉદાહરણ : विराजः कृशः किन्तु शक्तिमान् अस्ति। (शक्तिमान्)

(1) अमिता शिशुः _____। (निर्भया)

(2) नीमवृक्षः तीक्तः _____। (गुणकारी)

(3) रुग्णालयः लघुः _____। (स्वच्छः)

(4) पर्वतः दूरे: _____। (रमणीयः)

(5) कोकिलः कृष्णः _____। (मधुभाषी)

6. ઉદાહરણ મુજબ વિધાન બનાવો :

ઉદાહરણ : एषः बकः। _____। (एकाग्रता)

एषः बकः। तस्य एकाग्रता प्रचलिता।

(1) एषः शुकः। _____। (स्वामिभक्तिः)

(2) एषः कुक्कुरः। _____। (स्वामिभक्तिः)

(3) सः राष्ट्रपिता। _____। (संकल्पशक्तिः)

(4) सः शिक्षकः। _____। (कार्यनिष्ठा)

(5) सः छात्रालयः। _____। (व्यवस्था)

7. તમારા શિક્ષક જે શબ્દો બોલે તે ધ્યાનથી સાંભળીને તમારી નોટબુકમાં લખો. તમારા શિક્ષકને તપાસવા આપો અથવા તમારા સહપાઠી પાસે તપાસ કરાવો. જો ભૂલ હોય તો ફરીથી ભૂલ ન થાય તેની તકેદારી રાખો.

8. તમારી નોટબુકમાં ઊંટનું ચિત્ર દોરી તેમાં રંગ પૂરો.

प्रवृत्ति :

- આ વાર્તાનું વાચન કરો.
- તમારી શાળા કે ગામની લાઇબ્રેરીમાંથી ઈસપની બાળવાર્તા શોધીને વાંચો.
- તમારા વિસ્તારમાં જોવા મળતાં પશુ-પક્ષીઓની યાદી બનાવી તેમની વિશેષતા લખો.